# Dakshakrita Ganesha Stuti

# દક્ષકૃતા ગણેશસ્તુતિઃ

## Document Information

Text title : Dakshakrita Ganesha Stuti

File name : gaNeshastutiHdakShakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 20 | 1.20 37-48||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# દક્ષકૃતા ગણેશસ્તુતિઃ

દક્ષ ઉવાચ ।
પૂર્વજન્મકૃતં પુણ્યં ફલિતં મે દ્વિજોત્તમ ।
યન્મયાઽદર્શિ તં રૂપં તે દ્વિવિધં પરમં મહત્ ॥ ૩૭॥

વૈનાયકઞ્ચ વૈપ્રં ચજન્મ મેઽજનિ સાર્થકમ્ ।
કારણાનાં પરં ત્વં ચકારણં છન્દસામપિ ॥ ૩૮॥

પરં જ્ઞેયં પરં બ્રહ્મ શ્રુતિમૃગ્યં સનાતનમ્ ।
ત્વમેવ સાક્ષી સર્વસ્વ સર્વસ્યાન્તર્બહિસ્તથા ॥ ૩૯॥

ત્વમેવ કર્તા કાર્યાણાં લઘુસ્થૂલશરીરિણામ્ ।
નાનારૂપ્યેકરૂપી ત્વં નિરૂપશ્ચ નિરાકૃતિઃ ॥ ૪૦॥

ત્વમેવ શઙ્કરો વિષ્ણુસ્ત્વમેવેન્દ્રોઽનલોઽર્યમા ।
ભૂવાયુખસ્વરૂપોઽપિ જલસોમર્ક્ષરૂપવાન્ ॥ ૪૧॥

વિશ્વકર્તા વિશ્વપાતા વિશ્વસંહારકારકઃ ।
ચરાચરગુરોર્ગોપ્તા જ્ઞાનવિજ્ઞાનવાનપિ ॥ ૪૨॥

ભૂતં ભાવિ ભવચ્ચૈવ ત્વમેવેન્દ્રિયદેવતાઃ ।
કલાઃ કાષ્ઠા મુહૂર્તાશ્ચ શ્રીર્ધૃતિઃ કાન્તિરેવ ચ ॥ ૪૩॥

ત્વમેવ સાઙ્ખ્યં યોગશ્ચ શાસ્ત્રાણિ શ્રુતિરેવ ચ ।
પુરાણાનિ ચતુઃષષ્ટિકલા ઉપનિષત્તથા ॥ ૪૪॥

ત્વમેવ બ્રાહ્મણો વૈશ્યઃ ક્ષત્રિયઃ શૂદ્ર એવ ચ ।
દેશો વિદેશસ્ત્વં ક્ષેત્રં પુણ્યક્ષેત્રાણિ યાન્યુત ॥ ૪૫॥

ત્વં પ્રમેયોઽપ્રમેયશ્ચ યોગિનાં જ્ઞાનગોચરઃ ।
ત્વમેવ સ્વર્ગઃપાતાલં વનાન્યુપવનાનિ ચ ॥ ૪૬॥

ઓષધ્યોઽથ લતાવૃક્ષકન્દમૂલફલાનિ ચ ।

અણ્ડજા જારજા જીવાઃ સ્વેદજા ઉદ્ભિજા અપિ ॥ ૪૭॥

કામઃ ક્રોધઃ ક્ષુધા લોભો દમ્ભો દર્પો દયા ક્ષમા ।
નિદ્રા તન્દ્રા વિલાસશ્ચ હર્ષઃ શોકસ્ત્વમેવ ચ ॥ ૪૮॥

ઇતિ દક્ષકૃતા ગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૨૦ । ૧.૨૦ ૩૭-૪૮॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 20 . 1.20 37-48..

Proofread by Preeti Bhandare

---

*Dakshakrita Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*